22E

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहि:स्थ**

**परीक्षा : मे – २०२५**

**सत्र ५ वे**

**विषयः भारतचम्पू (22E453)**

**दिनांक :** १५/०५/२०२५ **गुण :**१०० **वेळ :** दु. २.०० ते ५.००

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१. केषामपि पञ्चानां स्वभाषया अनुवादः करणीयः।** ३०

१. एकदा तु ते सर्वेऽपि सुपर्वसरितःसलिलेषु चिरं विहृत्य समुत्तीर्णा वीचीभिरनीचीभिरुत्कूलितफेनकूटेष्विव पटगृहवाटीषु परिगृहीतमनोहराम्बपटीरहाराभ्यवहाराः कुमाराः कुशलकुशीलवबालककुलशीलितविचित्रवादित्रकलशीरवविवशीकृतमानसः सुखमासामासुः।

२. इति व्याजस्तुतिवचनेन पौरवान्ते वसता भार्गवान्तेवसता प्रधर्षितः पार्षतस्तेन सार्धमर्धराज्यपरिवर्तनेन परमङ्गीकृतकृत्यविदां ककुदस्तौ जम्भरिपुकुम्भसम्भवावुभावप्युपयममेव प्रवर्तयितुं कृतक्रतुनिर्वर्तनः सोमकान्तिकोपस्यौ पुत्रौ भागीरथीतटवनावसथस्य याजस्य मुनिराजस्य याजनानुग्रहेण परिजग्राह।

३. या खलु पुरा कुरुधराधिपापराधसमेधितक्रोधेन हलधरेण निजायुधेन हठात्कर्षणशिक्षया तत्क्षणं समुत्क्षिप्तदक्षिणक्षितिभागा तदीयभुवनभूषणायमानां भोगावतीमात्मना विजेतुं भागीरथीपाथःपथेनावतीर्य कृतप्रस्थानेवाद्यापि दृश्यते।

४. तुहिनकिरणवंशस्थूलमुक्ताफलानां विपुलभुजविराजद्वीरलक्ष्मीविभूम्नाम्।
हसितसुरपुरश्रीरस्ति सा हस्तिनाख्या रिपुजनदुरवापा राजधानी कुरूणाम् ।

५. सन्तानमूलमिदमेकमपत्यमास्ते संवर्तकालसहजश्च स राक्षसेन्द्रः।
सम्भूयते च समयः क्षपया महत्या सन्तीर्यतां कथमियं सखि मे विपत्तिः।।

६. उपेत्य तां पाण्डुरुदारविक्रमः प्रजामनः पल्लवयन्प्रशासनात् ।
यशःप्रकाशैर्यमुनासखीसखैर्निनाय लोकं निजनामवाच्यताम्।।

७. अथ कदाचन मृगयोपलालितहृदयो नरेश्वरोऽयमश्वे शशिश्वेततेजसि विश्वातिशायिनि रयविजितमातरिश्वनि कृताधिरोहः पार्श्वधृतविश्वकद्रुभिरनेकवागुरोपकरणानुरोधैर्योधैरनुद्रुतो मृदुभद्रविनयाभ्यां यदुमद्रतनयाभ्यामनुविद्धः सिद्धगणगणनीयमहिमवतो हिमवतोऽवजगाहे महतीमटवीतटवीथिकाम्।।

**प्र.२. ससन्दर्भं चतुर्णां स्पष्टीकरणं लिखत।** २४

१. मातृदोषादिव बहिरगदन्तरप्यन्धभावम्।
२. कुर्याः वः स्मृत एव कर्मसु हरेः शक्तेरपि स्रंसनाम्।
३. स्वविशिख इव कामः सोऽपि किं पञ्चधाभूत्।
४. दम्भोलिमिव सहस्राक्षः शापमुदस्राक्षीत्।
५. बाणशापप्रयोगाभ्यां बाधितौ तावुभावपि।

**प्र.३. सविस्तरं द्वौ लिखत।** ३०

१. द्रौपदीस्वयंवरवृत्तान्तः। २. एकचक्रनिवासः। ३.लाक्षागृहवृत्तान्तः।

**प्र.४अ) रूपपरिचयं लिखत।** ०५

त्वरस्व, समीक्ष्य, तस्मै, पितृभिः ,मेनिरे,

**आ) सन्धिविग्रहं कुरुत।** ०५

गुरुर्नीतमधिज्यधन्वना, निष्पतद्भिर्बाष्पैस्तरङ्गित, किमभीष्टतापदे
सर्वेऽप्यहंपूर्विकया, धृतिमानितस्ततोऽष्टासु

**इ) समासानां नामनिर्देशपूर्वकं विग्रहं कुरुत।** ०६

आबालवृद्धम्, नरेन्द्रनन्दनः, तटवीथिका

----------